श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयग्रीवाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयग्रीवाष्टोत्तरशतनामस्तोत्रम् ॥

शृण्वन्तु ऋषयः सर्वे हयस्याष्टोत्तरं शतम्।
हयग्रीवो महाविष्णुः केशवो मधुसूदनः ॥ 1 ॥

गोविन्दः पुण्डरीकाक्षो विष्णुर्विश्वम्भरो हरिः।
आदित्यः सर्ववागीशः सर्वाधारः सनातनः ॥ 2 ॥

निराधारो निराकारो निरीशो निरुपद्रवः।
निरञ्जनो निष्कलङ्को नित्यतृप्तो निरामयः ॥ 3 ॥

चिदानन्दमयः साक्षी शरण्यः सर्वदायकः।
श्रीमान् लोकत्रयाधीशः शिवः सारस्वतप्रदः ॥ 4 ॥

वेदोद्धर्ता वेदनिधिर्वेदवेद्यः प्रभूत्तमः।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिः परात्परः ॥ 5 ॥

परमात्मा परञ्ज्योतिः परेशः पारगः परः।
सर्ववेदात्मको विद्वान् वेदवेदान्तपारगः ॥ 6 ॥

सकलोपनिषद्वेद्यो निष्कलः सर्वशास्त्रकृत्।
अक्षमालाज्ञानमुद्रायुक्तहस्तो वरप्रदः ॥ 7 ॥

पुराणः पुरुषश्रेष्ठः शरण्यः परमेश्वरः।
शान्तो दान्तो जितक्रोधो जितामित्रो जगन्मयः ॥ 8 ॥

जन्ममृत्युहरो जीवो जयदो जाड्यनाशनः।
जपप्रियो जपस्तुत्यो जापकप्रियकृत् प्रभुः ॥ 9 ॥

विमलो विश्वरूपश्च विश्वगोप्ता विधिस्तुतः।
विधीन्द्रशिवसंस्तुत्यः शान्तिदः क्षान्तिपारगः॥ **10** ॥

श्रेयःप्रदः श्रुतिमयः श्रेयसांपतिरीश्वरः।
अच्युतोऽनन्तरूपश्च प्राणदः पृथिवीपतिः॥ **11** ॥

अव्यक्तो व्यक्तरूपश्च सर्वसाक्षी तमोहरः।
अज्ञाननाशको ज्ञानी पूर्णचन्द्रसमप्रभः॥ **12** ॥

ज्ञानदो वाक्पतिर्योगी योगीशः सर्वकामदः।
महायोगी महामौनी मौनीशः श्रेयसांपतिः॥ **13** ॥

हंसः परमहंसश्च विश्वगोप्ता विराट् स्वराट्।
शुद्धस्फटिकसङ्काशो जटामण्डलसंयुतः॥ **14** ॥

आदिमध्यान्तरहितः सर्ववागीश्वरेश्वरः।
नाम्नामष्टोत्तरशतं हयग्रीवस्य यः पठेत्॥ **15** ॥

वेदवेदाङ्गवेदान्तशास्त्राणां पारगः कविः।
वाचस्पतिसमो बुद्ध्या सर्वविद्याविशारदः॥ **16** ॥

महदैश्वर्यमासाद्य कलत्राणि च पुत्रकान्।
अवाप्य सकलान् भोगान् अन्ते हरिपदं व्रजेत्॥ **17** ॥

॥ इति श्रीहयग्रीवाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥